**तपोमूर्त्ति** पु॰ तपः आलोचनभेद एव मूर्त्तिरस्य, तपःप्रधाना मूर्त्तिरस्य वा ।१परमेश्वरे २तपस्विनि च । रुद्रसावर्णिरूपनामसमन्वन्तरे सप्तर्षिमध्ये ३ऋषिभेदे च "ऋषयस्तु तपोमूर्त्तिस्तपस्व्यग्नीध्रकादयः" भाग०८।१३।१२

**तपोमूल** त्रि॰ तपो मूलमस्य । १तपोहेतुके स्वर्गादौ तामसस्य मनोः २पुत्रभेदे पु॰ तपस्यशब्दे दृश्यम् ।

**तपोरति** त्रि॰ तपसि रतिरस्य । १तपःपरायणे तामसमनोः पुत्रभेदे पु॰ तपस्यशब्दे दृश्यम् ।

**तपोरवि** पु॰ तपसा रविरिव । १सूर्य्यतुल्यतेजोयुक्ततपस्के चतुर्थमन्वन्तरे पौलहे सप्तर्षिभेदे तपोधृतिशब्दे दृश्यम् ।

**तपोलोक** पु॰ तपोनाम लोकः । ऊर्द्ध्वस्थेषु सप्तसु लोकेषु भुवनभेदे तपःशब्दे दृश्यम् । स च भूमेस्तत्त्वकोटि योजनोपरि वर्त्तते । "चतुःकोटिप्रमाणं तु तपोलोकोऽस्ति भूतलात् । उपरिष्टात् चितेरष्टौ कोटयः सत्यमीरितम्" काशीख॰ २२ अ॰ उक्तेः । स च विराट्पुरुषस्य स्तनद्वयरूपेण कल्पितः यथाह भाग॰ २।४।२८। "भूर्लोकः कल्पितः पद्भ्यां भुवर्लोकोऽस्य नाभितः । हृदा स्वर्लोक उरसा महर्लोको महात्मनः । ग्रीवायां जनलोकोऽस्य तपोलोकः स्तनद्वयात् । मूर्द्धभिः सत्यलोकस्तु ब्रह्मलोकः सनातनः" ।

**तपोऽवट** पु॰ तपसोऽवट इव । ब्रह्मावर्त्तदेशे त्रिका॰ ।

**तपोवन** न॰ ६त॰ । १तापससेव्ये वनभेदे, "वधूर्भक्तिमती चैनामर्च्चितामातपोवनात्" तपोवनावृत्तिपथं गताभ्याम्" रघुः । २तन्नामके तीर्थभेदे च ।

**तपोऽशन** पु॰ चतुर्थमन्वन्तरे सप्तर्षिमध्ये पौलस्त्ये १ऋषिभेदे तपोधृतिशब्दे दृश्यम् । २तामसस्य मनोः पुत्रभेदे तपस्यशब्दे दृश्यम् ।

**तप्त** त्रि॰ तप–क्त । १दग्धे २तापयुक्ते च हेमच॰ । "तप्ते पयसि दध्यानयति सा वैश्वदेव्यामिक्षा भवति" श्रुतिः । "स तप्तकार्त्तस्वरभास्वराम्बरः" माघः ।

**तप्तकाञ्चन** न॰ कर्म॰ । अग्निसंयोगभेदेन विमले काञ्चने । "तप्तकाञ्चनवर्णाभां सुप्रतिष्ठां सुलोचनाम्" दुर्गाध्यानम् ।

**तप्तकुम्भ** पु॰ तप्तः कुम्भो यत्र । नरकभेदे तत्स्वरूपं यथा "अतःपरं भीमतरं तप्तकुम्भं निबोध मे । समन्ततस्तप्तकुम्भो वह्निज्वालासमावृतः । ज्वलदग्निचयोद्वृत्त तैलायस्चूर्णपूरितः" मार्क॰ पु॰ ।

**तप्तकृच्छ्र** न॰ "षट्पलन्तु पिबेदम्भस्त्रिपलन्तु पयः पिबेत् । पलमेकं पिबेत् सर्पिस्तप्तकृच्छ्रं विधीयते" स्मृत्युक्ते व्रतभेदे, "पयोघृतमुदकं वायुं तप्तं प्रतित्र्यहं पिबेत् स तप्तकृच्छ्र इति गौतमोक्तेः पुंस्त्वमपि । "तप्तकृच्छ्रं चरन् विप्रो जलक्षीरघृतानिलान् । प्रतित्र्यहं पिबेदुष्णान् सकृत्स्नायी समाहितः" मनुः । तप्तानिलपानन्तु तप्तक्षीरवाष्पपानम् । एतद्द्वादशाहसाध्यम् । जलादिपरिमाणमुक्तं ब्रह्मपुराणे "तप्तकृच्छ्रं व्रतं कुर्वन् त्र्यहं सायं पिबेच्छुचिः । षट्पलानि सुतप्तस्य तोयस्य सुसमाहितः । प्रभाते त्रीणि दुग्धस्य सुतप्तस्य पिबेत् त्र्यहम् । पानं घृतस्य तप्तस्य मध्याह्ने त्रिदिनं पिबेत् । वायुभक्षस्त्र्यहं चान्यं निर्दहेत् पातकं द्विजः" याज्ञवल्क्यः । "तप्तक्षीरघृताम्बूनामेकैकं प्रत्यहं पिबेत् । एकरात्रोपवासस्तु तप्तकृच्छ्रस्तु साधनः" एतच्चतुरहसाध्यं तप्तकृच्छ्रम् प्रा॰ वि॰।

**तप्तपाषाणकुण्ड** पु॰ नरकभेदे नरकशब्दे दृश्यम् ।

**तप्तमाष** पु॰ तप्तं माषमितं सुवर्णादिकं यत्र । दिव्यभेदे । तद्विधिः वीरमित्रोदये दर्शितो यथा तत्र पितामहः "तप्तमाषस्य वक्ष्यामि विधिमुद्धरणे शुभम् । कारयेदायसम्पात्रं ताम्रं वा षोड़शाङ्गुलम् । चतुरङ्गुलखातन्तु मृण्मयं वापि मण्डलम्" । कर्षषोड़शांशप्रमितं मण्डलं सूर्य्यमण्डलाकारं वर्त्तुलमिति यावत् । एतादृशं पात्रं घृततैलाभ्यां पूरयेदित्याह स एव "पूरयेद्घृततैलाभ्यां पलैर्विंशतिभिस्तु तत् । सुवर्णं माषकन्तस्मिन् सुतप्ते निःक्षिपेत्ततः । अङ्गुष्ठाङ्गुलिमूलेन तप्तमाषकमुद्धरेत्" इति । सुवर्णमाषकर्षषोड़शांशप्रमाणम् । सुवर्णग्रहणं रूप्यमाषनिवृत्त्यर्थम् । तन्माषपरिमितं हिरण्यं ताम्रं वा पिण्डीकृत्य निःक्षिपेत् । अङ्गुष्ठाङ्गुलिमूलेन अङ्गुष्ठतर्जनीमध्यमाभिरित्यर्थः । इदञ्च तप्तमाषोद्धरणम् प्राड्विवाकेन घृततैलयोस्तापे समारब्धे धर्मावाहनादिशोध्यशिरःपत्रारोपणान्तं सर्वसाधारणं कर्म विधाय "त्वमग्ने । वेदाश्चत्वारः" इत्यादिना अग्निदिव्यप्रकरणोक्तेन मन्त्रेणाभिमन्त्र्य कारयितव्यम् शोध्यस्तु याज्ञवल्क्योक्तेन "त्वमग्ने ! सर्वभूतानामित्यादि" मन्त्रेणाभिमन्त्र्य तप्तमाषमुद्धरेत् । अतएव वृहस्पतिः "समुद्धरेत्तैलघृतात् सुतप्तात्तप्तमाषकमिति" । कल्पान्तरमाह स एव "सौवर्णे राजते ताम्रे वायसे मृण्मयेऽपि वा । गव्यं घृतमुपादाय तदग्नौ तापयेच्छुचिः । सौवर्णीं राजतीं ताम्रीमायसीं वा सुशोभनाम् । सलिलेन सकृद्धौतां प्रक्षिपे-